# M.A. (Part—I) (Old) Examination
## SANSKRIT
## Paper—I
## (Vedic Language & Literature)

Time : Three Hours] [Maximum Marks : 100

सूचना : निर्देशाभावे उत्तराणि स्वीकृतभाषयैव लिखत।

1. (अ) तिसृणाम् ऋचाम् अनुवादं टिप्पणीसहितं लिखत : 15

(1) यः पृथिवीं व्यथमानामदृंहद्यः
पर्वतान् प्रकुपिताँ अरम्णात्।
यो अन्तरिक्षं विममे वरीयो
यो द्यामस्तभ्नात्स जनास इन्द्रः॥

(2) नाहं तं वेद दभ्यं दभत्स
यस्येदं दूतीरसरं पराकात्।
न तं गूहन्ति स्रवतो गभीरा
हता इन्द्रेण पणयः शयध्वे॥

(3) एषा शुभ्रा न तन्वो विदानोर्ध्वेव
स्नाती दृशये नो अस्थात्।
अपद्वेषो बाधमाना तमांस्युषा
दिवो दुहिता ज्योतिषागात्॥

(4) अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि
स इद्देवेषु गच्छति॥

(5) सोमस्य धारा पवते नृचक्षस
ऋतेन देवान्हवते दिवस्परि।
बृहस्पते रवथेना वि दिद्युते
समुद्रासो न सवनानि विव्यचुः।

(ब) वरुणदेवतां वर्णयत। 10

अथवा

सरमापणिसंवादसूक्तस्य सारं लिखत।

2. निम्नगां ऋचां विवरणं कुरुत । 15

(1) तस्माद्यज्ञात् सर्वहुतः संभृतं पृषदाज्यम्।
पशून् ताँश्चक्रे वायव्यानारण्यान् ग्राम्याश्चये॥

(2) इहैवाभि वि तनूभे आर्त्नी इव ज्यया।
वाचस्पतिर्नि यच्छतु मय्येवास्तु मयि श्रुतम्।

(3) इमा आपः प्र भराम्ययक्ष्मा यक्ष्मनाशनीः।
गृहानुप प्र सीदाम्यमृतेन सहाग्निना।

(4) उपहूतो वाचस्पतिरुपास्मान् वाचस्पतिर्ह्वयताम्।
सं श्रुतेन गमेमहि मा श्रुतेन वि राधिषि॥

(5) सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।
स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम्॥

(कठोपनिषद्)

3. (अ) त्रयाणां मन्त्राणां सटिप्पणिकम् अनुवादं लिखत । 12

(1) अनुपश्य यथा पूर्वे
प्रतिपश्य तथा परे।
सस्यमिव मर्त्यः पच्यते
सस्यमिवाजायते पुनः॥

(2) देवैरत्रापि विचिकित्सितं पुरा
न हि सुविज्ञेयमणुरेष धर्मः।
अन्यं वरं नचिकेतो वृणीष्व
मा मोपरोत्सीरति मा सृजैनम्॥

(3) आसीनो दूरं व्रजति
शयानो याति सर्वतः।
कस्तम्मदामदन्देवं
मदन्यो ज्ञातुमर्हति॥

(4) येयम्प्रेते विचिकित्सा
मनुष्येऽस्तीत्येके नायमस्तीति चैके।
एतद्विद्यामनुशिष्टस्त्वयाऽहं
वराणामेष वरस्तृतीयः॥

(5) श्वो भावा मर्त्यस्य यदन्तकैतत्
सर्वेन्द्रियाणाञ्जरयन्ति तेजः।
अपि सर्वंजीवितमल्पमेव
तवैव वाहास्तव नृत्यगीते॥

(ब) टिप्पणीद्वयं लिखत : 8

(1) तृतीयवर.

(2) आत्मज्ञानस्वरूपम्

(3) अग्निविद्या

(4) जीवात्मा।

**अथवा**

नचिकेतस: स्वभावचित्रणं कुरूत।

**अथवा**

वाजस्रवा-नचिकतसो: संवाद: वर्णयत।

## (निरुक्तम्)

4. (अ) प्रकरणमुल्लिख्य **द्वयोर्विवरणं** कुरुत : 10

(1) न सर्वाणि इति गार्ग्यो वैयाकरणानाञ्चैके।

(2) साक्षात्कृतधर्माण: ऋषय: बभूवु:।

(3) षड्भावविकारा: भवन्तीति वार्ष्यायणि:।

(4) हीत्येषोऽनेककर्मा।

(ब) निरुक्तपद्धत्या **द्वयोर्निर्वचनं** कुरुत : 10

(1) अध्वर्यु:

(2) निघण्टु:

(3) शक्वरी

(4) ह्रद:।

## (पाणिनीय शिक्षा)

5. (अ) **द्वयो**: कारिकयो: विवरणं कुरुत : 10

(1) अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा।
शास्त्रानुपूर्वं तद् विज्ञातं यथोक्तं लोकवेदयो:।।

(2) संवृतं मात्रिकं ज्ञेयं विवृतं तु द्विमात्रिकम्।
घोषा वा संवृता: सर्वे अघोषा विवृता: स्मृता:।।

(3) व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत्।
भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत्।।

(4) कण्ठे माध्यन्दिनयुगं मध्यमं त्रैष्टुभानुगम्।
तारं तार्तीयसवनं शीर्षण्यं जगतानुगम्।।

(ब) टिप्पण्यौ लिखत : 10

(1) पाठकगुणा:

(2) त्रिषष्टि: चतुषष्टि: वा वर्णा:

(3) वर्णोच्चारस्थानानि

(4) गतिरष्टविधोष्मण:।